International Journal of Sanskrit Research 2016; 2(5): 92-93

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(5): 92-93
© 2016 IJSR
www.anantaajournal.com
Received: 21-07-2016
Accepted: 22-08-2016

**Krishna Arya**
Assistant Prof. Department,
Sanskrit B. P. S. M. V. Khanpur.
R. C. kharl, Jind, Haryana,
India

**Correspondence**
**Krishna Arya**
Assistant Prof. Department,
Sanskrit B. P. S. M. V. Khanpur.
R. C. kharl, Jind, Haryana,
India

# नैषधमहाकाव्ये आश्रम–व्यवस्थायाः निरूपणम्

**Krishna Arya**

महाकविश्रीहर्षेण नैषधचरित–महाकाव्ये आश्रमव्यवस्थाक्रमेण–ब्रह्मचर्यः, गृहस्थः, वानप्रस्थः, संन्यासादिरूपे विस्तृतवर्णनमत्र प्रस्तूयते। इयं व्यवस्था जीवनेन सहरासायनिकरीत्या मिश्रिताऽस्ति। मानव जीवनं पुरा शतवार्षिकममन्यत। मनुष्यस्य श्रमश्चतुर्विधः– अध्ययनात्मक, सर्जनात्मकः, तपस्यात्मकः, योगात्मकश्च। रामायण काले आश्रममाध्यमेन जीवनपर्यन्तमधिराधिकः श्रमः क्रियते।
अध्ययनात्को ब्रह्मचर्याश्रमः, सर्जनात्मको गृहस्थाश्रमः, तपस्यात्मको वानप्रस्थः योगात्मकश्च तु संन्यास एव। आश्रमाणां व्यवस्था नैषधकालीनसमये पूर्णरूपेण प्रचलिता आसीत्–

**ब्रह्मचर्याश्रम :–**
जीवनस्य प्रथमभागे प्राप्तस्य ज्ञानालोकस्य प्रकाशे जीवनयात्रा सानन्दा विधीयते। मानवजीवनस्य साफल्यस्य यात्रा तस्यार्जितज्ञानस्य मात्रयैव परिमिता। ब्रह्मचर्यजीवनस्य तत्कालीन स्वरूपादीनां विमर्शो नैषधीयचरित महाकाव्ये प्राप्यते। अस्यामवस्थायां बालकाः स्वगुरोः समीपे वसन्ति। ते भिक्षाटनं कृत्वा स्वस्य गुरूणाञ्च पालन–पोषणं कुर्वन्ति स्म। गुरूभ्यः उपनिषदां शिक्षामकुर्वन्। यथा हि –

प्रसून बाणाद्वयवादिनी सा माचिद्द्विजेनोपनिषत्पिकेन।
अस्याः किमास्यद्विजराजतो वा नाधीयते भैक्षभुजा तरूभः।।[1]

नैषधमहाकाव्ये विद्याभ्यासान् बालकान् चकोरशिशुरूपे भज्यते अनेन प्रतीतिर्भवति यत् छात्रस्य प्रारम्भिक शिक्षायाः आयुः पंचवर्षेभ्यः वा प्रारभ्यते। विद्योपार्जनस्य अवस्थेयं उपयुक्ता मन्यते। यदुक्तं कविना–

अयि! ममैष चकोर शिशुर्मुनेर्व्रजति विन्धुपिबस्य न शिष्यताम्।
अशितुमब्धिमधीतवतोऽस्य वा शशिकराः पिबतः कति शीकराः?[2]

नैषधकालीनसमाजे सम्भवतो द्विविधं ब्रह्मचारी प्राप्यते।
यो ब्रह्मचारी आजीवनं विवाहं नाकरोत्, सः नैष्ठिको ब्रह्मचारी तथा यो ब्रह्मचर्यस्यानन्तरं गृहस्थाश्रमं प्रविशति स 'उपकुर्वाणः' ब्रह्मचारी कथ्यते स्म। यथा हि–

पुनर्वक्ष्यसि मा मैवं मथमुद्वक्ष्यसे तु सः।
सृष्टवान् परमेष्ठी यं नैष्ठिक ब्रह्मचारिणम्।।[3]

यो ब्रह्मचारी ब्रह्मचर्यजीवने हि स्त्रीसम्भोगकारणात् पवितमभूत् तं ब्रह्मचारिणम् 'अवकीर्णी' कथ्यते।
तद्यथा–

द्रोहिणं द्रोहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम्।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घयस्त्वया न किम्?[4]

केचन ब्रह्मचारिणः 'शिलवृत्या' कश्चनः 'उध्वृत्या' माध्यमेन जीविकोपार्जनमकुर्वन्। एतादृशाः ब्रह्मचारिणः समाजे आदरस्थानं प्राप्नुवन्ति। तस्मिन् समये राजानः तान् पूज्यं स्वीकृत्य अधिकं सम्मानं दत्तवन्तः।
यथाहि–

त्वया जगत्युञ्छितकान्तिसारे यदिन्दुनाऽशीलि–शिलोञ्छवृतिः।
आरोपि तन्माणवकोऽपि मौलौ स यत्वराज्येऽपि महेश्वरेण।।[5]

नैषधकालीनसमाजे वेदपाठिनोऽध्ययनस्य प्रारम्भे, अन्ते च गुरूचरणं स्तुतवन्तः। तं ब्रह्मचारिणं 'ब्रह्माञ्जलिः' नाम्नाभिधीयते।
नैषधसमाजे नैषधमहाकाव्येश्रीहर्षेण कविना 'स्नातमशब्दस्य' प्रयोगकृतः वेदाध्ययनात्परं विद्यार्थी स्नातकमिति निगद्यते। आश्रमेऽस्मिन् विद्यार्थी सरलजीवनयापनं कृतवान्।

**गृहस्थाश्रमः–**
गृहस्थाश्रमे जीवनप्रदायिनी–प्राणवायुवत् वर्तते, यस्याश्रयं नीत्वा अन्ये त्रयः आश्रमाः तिष्ठन्ति। नैषधकारेण श्रीहर्षेण मोहवर्णनप्रसङ्गे गृहस्थाश्रमस्य श्रेष्ठता उल्लेखिता। यथा हि –

ब्रह्मचारि वनस्थायि यतयो गृहिणं यथा।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः।।[7]

नैषधकारेण विशेषतया कथ्यते यत् सफलजीवनं तदेव वर्तते यत्र धर्मार्थकामवर्गत्रयस्य समुचितसामंजस्यं भवेत्। एतस्य सम्पादनं उपर्युक्त वर्गत्रय माध्यमेन हि भवितु शक्यते। नैषधमहाकाव्ये –

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति।
न लोकमाकलोकयथापवर्गात् त्रिवर्गमर्वांचमानम्।।[8]

नैषधकालीनसमाजे सफल दाम्पत्यजीवनस्यकृते परस्परमध्ये दृढ़ानुरागस्य परमावश्यकं मन्यते। अस्मिन् सम्बन्धे नल–दमयन्त्योः प्रेमः दर्शनीयमस्ति।

**वानप्रस्थाश्रम :–**
नैषधमहाकाव्ये वानप्रस्थाश्रमस्य सम्बन्धे उपलब्धः संकेतो नैवाधिकं वर्तते। यत्र तत्र सूक्ष्मरूपे प्राप्यते। कविना वानप्रस्थीनां कृते 'वैखानस' शब्दस्य प्रयोगः कृतः। तस्मिन् समये वानप्रस्थिनो वनेषु आसन् अतः कलि वनेषु स्थातुं शरणोपलब्धं नाभवत्।[9]
श्री हर्षेण वानप्रस्थीनां कृते 'मुनि' शब्दस्य व्यवहारों विहितः। एते आयासपूर्वकं स्वमतोवृत्तिषु नियन्त्रिता आसन्। यथा हि–

हंसं तनौ सन्निहितं चरन्तं मुनेमनोवृत्तिरिव स्विकायाम्।
ग्रहीतुकामादरिणा शयेन यत्रादसौ निश्चलां जगाहे।।[10]

कलेः कथनात् प्रतीतिर्भवति यत् तापसे क्रोधं सर्वदा वर्जितमासीत्।[11] शिष्टात्मकेन वर्णनेन ज्ञायते यत् मुनयः पर्वतेषु अपि वसन्ति स्म। अतिथिसत्कारस्य महात्म्यं सर्वेषां आश्रमाणां कृते समरूपमासीत्। वनवासिनो महर्षयो वनेषु उत्पन्नैः फलपुष्पैश्च अतिथिसत्कारं कृतवन्तः। यदुक्तम् श्रीहर्षेण–

फलानि पुष्पाणि च पल्लवेकर वयोतिपातोद्गवातवेपिते।
स्थितैः समादाय महर्षि वार्धकाद्वने तदातिथ्यशिक्षिशाखिभिः।।[12]

संन्यासाश्रमः – आश्रमेऽस्मिन् व्यक्ति परिव्राजकं भूत्वा लोककल्याणार्थमग्रसरं भवति। तस्य किमपि गृहं न वर्तते स्म। यायावरीजो जीवनमतिवाहितं कृत्वा परमतत्त्वं पर्यन्तं गच्छति। नैषधमहाकाव्ये वानप्रस्थाश्रमवत् संन्यासाश्रमस्यापि वर्णनं समुपलभ्यते। श्री हर्षस्य कथनानुसारं संन्यासी काषायवस्त्रं धृतवन्तः। एतेषां कृते कविना 'भिक्षु' शब्दस्य प्रयोगः कृतः। तद्यथाः–

आदाय दण्डं सकलासु दिक्षु योऽयं परिभ्राम्यति भानुभिक्षुः।
अब्धौ निमजन्निव तापसोऽयं सन्ध्याभ्रकषायमधत्त सायम्।।[13]

एते मधुकरीं भिक्षया कालं भाषयामासुः यथाहि
तुषार निःशेषितमब्जअर्गं विधातुकामस्य पुनर्विधातुः।
पंचस्विहास्य साङ्घि करेष्वभिख्याभिक्षाऽधुना माधुकरी सदृक्षा।।[14]
कविना संन्यासिवर्गाणां कृते 'यति' शब्दस्य प्रयोगो विहितः।[15] योगिनां कृते ब्राह्मणः प्राप्ति सर्वाधिकं आनन्द आसीत्।[16] एते मायाभ्यो मुक्तं जायन्ते। सर्वे योगिपुरूषः सूक्ष्मपरमाणुतत्त्वानां साक्षात्कारं कर्त्तुं पारयन्ति।

**सन्दर्भा :–**

1. नैषधीयचरितम्– पृ0सं0 – ७/४८
2. नैषधीयचरितम्– पृ0सं0 – ४/५८
3. नैषधीयचरितम्– पृ0सं0 – १७/११६
4. नैषधीयचरितम्– पृ0सं0 – १७/११७
5. नैषधीयचरितम्– पृ0सं0 – ८/४२
6. नैषधीयचरितम्– पृ0सं0 – २/१०
7. नैषधीयचरितम्– पृ0सं0 – १७/३२
8. नैषधीयचरितम्– पृ0सं0 – ६/१०५
9. नैषधीयचरितम्– पृ0सं0 – १७/१७२
10. नैषधीयचरितम्– पृ0सं0 – ३/४
11. नैषधीयचरितम्– पृ0सं0 – १७/७१
12. नैषधीयचरितम्– पृ0सं0 – १/७७
13. नैषधीयचरितम्– पृ0सं0 – २२/१२
14. नैषधीयचरितम्– पृ0सं0 – १/१०३
15. नैषधीयचरितम्– पृ0सं0 – १७/१७२
16. नैषधीयचरितम्– पृ0सं0 – ३/३।।